श्री तुलसी कवचं

श्री तुलसी कवचं

अस्य श्रीतुलसीकवचस्तोत्रमंत्रस्य श्रीमहादेव ऋषिः, अनुष्टुप्छंदः श्रीतुलसीदेवता, मम ईप्सितकामना सिद्ध्यर्थे जपे विनियोगः |

तुलसी श्रीमहादेवि नमः पंकजधारिणि |
शिरो मे तुलसी पातु फालं पातु यशस्विनी || 1 ||

दृशौ मे पद्मनयना श्रीसखी श्रवणे मम |
घ्राणं पातु सुगंधा मे मुखं च सुमुखी मम || 2 ||

जिह्वां मे पातु शुभदा कंठं विद्यामयी मम |
स्कंधौ कल्हारिणी पातु हृदयं विष्णुवल्लभा || 3 ||

पुण्यदा मे पातु मध्यं नाभिं सौभाग्यदायिनी |
कटिं कुंडलिनी पातु ऊरू नारदवंदिता || 4 ||

जननी जानुनी पातु जंघे सकलवंदिता |
नारायणप्रिया पादौ सर्वांगं सर्वरक्षिणी || 5 ||

संकटे विषमे दुर्गे भये वादे महाहवे |
नित्यं हि संध्ययोः पातु तुलसी सर्वतः सदा || 6 ||

इतीदं परमं गुह्यं तुलस्याः कवचामृतं |
मर्त्यानाममृतार्थाय भीतानामभयाय च || 7 ||

मोक्षाय च मुमुक्षूणां ध्यायिनां ध्यानयोगकृत् |
वशाय वश्यकामानां विद्यायै वेदवादिनां || 8 ||

द्रविणाय दरिद्राणां पापिनां पापशांतये |
अन्नाय क्षुधितानां च स्वर्गाय स्वर्गमिच्छतां || 9 ||

पशव्यं पशुकामानां पुत्रदं पुत्रकांक्षिणां |
राज्याय भ्रष्टराज्यानामशांतानां च शांतये || 10 ||

भक्त्यर्थं विष्णुभक्तानां विष्णौ सर्वांतरात्मनि |
जाप्यं त्रिवर्गसिद्ध्यर्थं गृहस्थेन विशेषतः || 11 ||

उद्यंतं चंडकिरणमुपस्थाय कृतांजलिः |
तुलसी कानने तिष्ठान्नासीनो वा जपेदिदं || 12 ||

सर्वान्कामानवाप्नोति तथैव मम सन्निधिं |
मम प्रियकरं नित्यं हरिभक्तिविवर्धनं || 13 ||

या स्यान्मृतप्रजानारी तस्या अंगं प्रमार्जयेत् |
सा पुत्रं लभते दीर्घजीविनं चाप्यरोगिणं || 14 ||

वंध्याया मार्जयेदंगं कुशैर्मंत्रेण साधकः |
साऽपि संवत्सरादेव गर्भं धत्ते मनोहरं || 15 ||

अश्वत्थे राजवश्यार्थी जपेदग्नेः सुरूपभाक् |
पलाशमूले विद्यार्थी तेजोऽर्थ्यभिमुखो रवेः || 16 ||

कन्यार्थी चंडिकागेहे शत्रुहत्यै गृहे मम |
श्रीकामो विष्णुगेहे च उद्याने स्त्रीवशा भवेत् || 17 ||

किमत्र बहुनोक्तेन शृणु सैन्येश तत्त्वतः |
यं यं काममभिध्यायेत्तं तं प्राप्नोत्यसंशयं || 18 ||

मम गेहगतस्त्वं तु तारकस्य वधेच्छया |
जपन् स्तोत्रं च कवचं तुलसीगतमानसः || 19 ||

मंडलात्तारकं हंता भविष्यसि न संशयः || 20 ||

इति श्रीब्रह्मांडपुराणे तुलसीमहात्म्ये तुलसीकवचं संपूर्णं |